# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री-3 (OLD) | प्रश्नपत्रम् – 8 | गुणाः – ५० |
| विषयः – पौरोहित्यम् | सत्रम् – 6 | समयः – १० तः १२ |
| दिनाङ्कः – २२/०७/२०२१ | सन्दर्भग्रन्थः – छान्दोग्यब्राह्मणम् | |

**सूचना - निम्नलिखितेषु दशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः ।**
**प्रत्येकं प्रश्नस्य समानगुणाः । (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः पद्ययोः व्याख्या कार्या ।**

१ सुमङ्गलीरियं वधूरिमां समेत पश्यत ।
सौभाग्यमस्यै दत्त्वायाथास्तं विपरेतन ॥
२ सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्रवां भव ।
ननान्दरि सम्राज्ञी भव सम्राज्ञी अधिदेवृषु ॥
३ अश्मा भव परशुर्भव हिरण्यमस्त्रुतरम्भव ।
आत्मा वै पुत्र नामासि स जीव शरदः शतम् ॥

**प्रश्नः २ छान्दोग्यब्राह्मणस्य प्रथमप्रपाठकस्य प्रथमखण्डे आगतानां दीर्घायुकामनापरकमन्त्राणां व्याख्यां कुरुत ।**

**प्रश्नः ३ सप्तपदीक्रमविधिं समन्त्रकं प्रतिपादयत ।**

**प्रश्नः ४ कयोरपि द्वयोः व्याख्या कार्या ।**

१ उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यमं श्रथाय ।
अथावयमादित्यव्रते तवा नागसो अदितये स्याम ॥
२ यथा समुद्रं स्रवन्तीः समवयन्ति दिशो दिशः ।
एवं मा सखायो ब्रह्मचारिणः समवयन्तु दिशो दिशः स्वाहा ॥
३ मानस्तोके तनये मान आयुषि मानो गोषु मानो अश्वेषुरीरिषः ।
मानो व्वीरान् रुद्रभामिनो वधीर्हविष्मन्तः सदमित्वा हवामहे ॥

**प्रश्नः ५ द्वितीयप्रपाठकस्य चतुर्थखण्डे आगतानामग्निस्तुतिपरकमन्त्राणां विवेचनं कुरुत ।**

**प्रश्नः ६ द्वितीयप्रपाठकस्य पञ्चमखण्डे आदित्यदेवस्य कृते आगतानां प्रार्थनापरकमन्त्राणां व्याख्या विधेया ।**

**प्रश्नः ७ कयोरपि द्वयोः व्याख्या कार्या ।**

१ वृक्ष इव पक्वतिष्ठसि सर्वान् कामान् भुवस्यते ।
यस्वैवं वेद तस्मै मे भोगान् धृक्ष्वाक्षतान् बृहन् ॥

२ यशोऽहं भवामि ब्राह्मणानां यशोविशाम् ।
यशः सत्यस्य भवामि भवामि यशसां यशः ॥

३ हतस्ते अत्रिणाकिमिर्हतस्ते जमदग्निना ।
गौतमेनतिनीकृतोऽत्रैव त्वाकिमेब्रह्मवद्यमवद्यम् ॥

**प्रश्नः ८ छान्दोग्यब्राह्मणे सायणभाष्यस्य किमस्ति वैशिष्ट्यम् ? विवेचयत ।**

**प्रश्नः ९ विवाहाङ्गभूतप्रायश्चित्तमन्त्राः ।**

**प्रश्नः १० दशानां एकवाक्येन उत्तरं लिखत ।**

१ छान्दोग्योपनिषद्ब्राह्मणे कति प्रपाठकाः सन्ति ?
२ कैकेयस्य संवादः कस्मिन् प्रपाठके अस्ति ?
३ छान्दोग्योपनिषद्ब्राह्मणं केन वेदेन सम्बन्धं धारयति ?
४ छान्दोग्यब्राह्मणे प्रथमप्रपाठके कस्य वर्णनमस्ति ?
५ पञ्चाग्निविद्यायाः वर्णनं कयोः संवादः वर्तते ?
६ छान्दोग्यब्राह्मणे प्रथमखण्डे प्रथमो मन्त्रः कः ?
७ प्रथमप्रपाठके कति खण्डाः सन्ति ?
८ श्वेतकेतुं कः उपदिशति ?
९ पञ्चाग्निविद्यायाः वर्णनं कस्मिन् प्रपाठके वर्तते ?
१० पञ्चाग्निविद्यासु प्रथमा विद्या का ?
११ चतुर्थप्रपाठके कस्य वर्णनमस्ति ?
१२ ॐकारोपासना कस्मिन् प्रपाठके अस्ति ?
१३ ब्रह्मचर्यार्थं गौतमेन किमाचरितम् ?
१४ 'एकविज्ञानेन सर्वविज्ञानं भवति' इति सूक्तिः कस्मिन् प्रपाठके वर्तते ?
१५ नारदाय सनत्कुमारोपदेशः कस्मिन् प्रपाठके वर्तते ?

****